COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

# पूर्णोपमालंकारः

## *"साधर्म्यमुपमा भेदे"*

अर्थात् उपमानोपमेययोः भेदे सति,साधर्म्यम्=उपमानोपमेययोः समानधर्मेण गुणक्रियादिरुपेण सम्बन्धः उपमालंकारः।सा च द्विविधा-पूर्णा लुप्ता च।पूर्णोपमालंकारस्य चत्वारि अङ्गानि-उपमेयम्,उपमानम्,साधारणो धर्मः,औपम्यश्चेति।तत्र सादृश्यानुयोगि उपमेयम्, सादृश्यप्रतियोगि उपमानम्, उपमेये उपमाने च उभयत्र सङ्गतो धर्मः साधारणो धर्मः,उपमावाचकश्च इवादिशब्दः।अस्याः पूर्णोपमायाः द्वो भेदौ-श्रौती आर्थी च।यस्यां पूर्णोपमायां यथेववादिशब्दाः प्रयुज्यन्ते,यत्र इवार्थे 'तत्र तस्यैव' इति सूत्रेण वतिप्रत्ययः प्रयुज्यते सा खलु उपमा श्रौती।इयं उपमा श्रौती श्रुतिमात्रेण षष्ठीवत् सम्वन्धं प्रतिपादयति।आर्थ्यां तु तुल्यादिशब्दाः प्रयुज्यन्ते एवञ्च 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण तुल्यार्थे वतिप्रत्ययः प्रयुज्यते।सा उपमा आर्थी अर्थबोधात् परं सादृश्यावगमात्।उक्तम् च वृत्याम्-"यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति । यद्यप्युमानविशेष णान्येते , तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् सम्बन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा । ' तत्र तस्यैव ' इत्यनेनेवार्थे विहितस्य वरूपादाने । ' तेन तुल्यं मुखम् ' इत्यादावुपमेये एव ' तत्तुल्यमस्य ' इत्यादौ चोपमाने एव ' इदं च तच्च तुल्यम् ' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात् तुल्यादिशब्दोपादाने आर्थी , तद्वत् ' तेन तुल्यं क्रिया चेद्वतिः ' इत्यनेन विहितस्य वते : स्थितौ" ।

पुनः श्रौती आर्थी च प्रत्येकं वाक्यसमासतद्धितगतत्वेन त्रिविधत्वात् पूर्णोपमा षड्विधा।उक्तं च मम्मटेन-"***श्रौत्यार्थी च भवेद् वाक्ये समासे तद्धिते तथा***"।पूर्णोपमायाः क्रमेण उदाहरणं यथा-

*"स्वप्नेऽपि समरेषु त्वां विजयश्रीन मुञ्चति ।*

*प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा" ॥*

अत्र स्वाधीनपतिका उपमानम्, विजयश्रीर्न उपमेया,'न मुञ्चति' इति परित्यागरुपः साधारणो धर्मः,यथा इति उपमावाचकशब्दश्च ।अस्मिन् श्लोके वाक्येन उपमायाः प्रकाशितत्वात् वाक्यगा श्रौती पूर्णोपमा भवति।

*"चकितहरिणलोललोचनायाः*

*क्रुधि तरुणारुणतारहारिकान्ति।*

*सरसिजमिदमाननं च तस्याः*

*सममिति चेतसि सम्पदं विधत्ते"।।*

अस्मिन् उदाहरणे कमलम् उपमानम्, नायिकायाः मुखम् उपमेयम्,रक्तिमाभा इति साधारणो धर्मः, समम् इति औपम्यवाचकशब्दः।अत्र वाक्येन उपमायाः उपस्थापितत्वात् वाक्यगा आर्थी उपमा स्यात्।

*"अत्यायतैर्नियमकारिभिरुद्धतानां*

*दिव्यैः प्रभाभिरनपायमयैरुपायैः*

*शौरिर्भुजैरिव चतुर्भिरदः सदा यो*

*लक्ष्मीविलासभवनैर्भुवनं बभार"।।*

अस्मिन् उदाहरणे विष्णोः भुजम् उपमानम्,राजा उपमेयः,अत्यायतादिः साधारणो धर्मः,इव इति उपमावाचकशब्दः।अत्र 'भुजैरिव' नित्यसमासे समासगा श्रौती उपमा भवति।

*"अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीत श्रीः।*

*सुरतरुसदृशः स भवानभिलषणीय : क्षितीश्वर न कस्य"।।*

COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

अस्मिन् उदाहरणे सुरतरुः उपमानम्,राजा उपमेयः,अभिलषणीयत्वं साधारणो धर्मः, सदृशः औपम्यस्य वाचकः।'सुरतरुसदृशाः' इत्यत्र समासे प्रयोगे समासगा आर्थी उपमा स्यात्।

*"गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्*

*दुरालोकः स समरे निदाघाम्बररत्नवत्"।।*

अस्मिन् उदाहरणे श्रौती आर्थी च उपमा अस्ति।प्रथमे गङ्गा उपमानम्, राजा उपमेयः,'गाम्भीर्यगरिमा' साधारणो धर्मः एवञ्च 'वत्' औपम्यस्य वाचकः।द्वितीये च सूर्य्यः उपमानम्, राजा उपमेयः,दूर्लक्ष्यत्वं साधारणो धर्मः, 'वत्' औपम्यस्य गमकः।द्वौ एव उदाहरणौ उपमा तद्धितगा।प्रथमे श्रौती उपमा द्वितीये च आर्थी उपमा स्यात्।प्रथमस्य व्याख्या गङ्गाभुजङ्गस्य इव=गङ्गाभुजङ्गवत्, द्वितीयस्य च व्याख्या-अम्वररत्नेन तुल्यम्=अम्वररत्नवत्।।

Ref.-

(1)কাব্যপ্রকাশ(নবম ও দশম উল্লাস)।

(2)काव्यप्रकाशरहस्यम्